संस्कृतवार्ताः

06.11.2024

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रशासनेन मेधावि-छात्रेभ्य: वित्तीय-साहाय्यं प्रदातुं पीएम्-विद्यालक्ष्मी-योजनायै स्वीकृति: प्रदत्ता।

· अमरीकाया: राष्ट्रपति-पदाय निर्वाचनस्य परिणामे डोनाल्ड-ट्रम्प: विजयम् अधिगतवान्। प्रधानमंत्री नरेन्द्र मोदी  राष्ट्रपति निर्वाचनस्य  विजये  श्री डोनल्ड ट्रंपाय वर्धापनानि प्रदत्तवान्।

· पञ्चपञ्चाशत्तम: अन्ताराष्ट्रिय-चलच्चित्र-महोत्सव: अस्य मासस्य विंशति दिनाङ्के गोवायां समारप्स्यते।

· नीति-आयोग: जलप्रबन्धन-संरक्षण-स्थिरता: प्रति जागरूकतां संवर्धयतुं अद्यारभ्य पञ्चदश-दिवसीयं जल-उत्सवं प्रारब्धवान्।

· छठपूजोत्सवम् अभिलक्ष्य रेलविभाग: यात्रिणां यात्रासौकर्यार्थं नवदश विशेष-रेलयानानि प्रचालयति।

<u>मन्त्रिमण्डलम्</u>

प्रशासनेन मेधावि-छात्रेभ्य: वित्तीय-साहाय्यं प्रदातुं पीएम्-विद्यालक्ष्मी-योजनायै स्वीकृति: प्रदत्ता। मन्त्रिमण्डलोपवेशने गृहीत-निर्णयानां विषये अद्य नवदिल्ल्यां वार्ताहरै: साकं सम्भाषमाण: सूचनाप्रसारणमन्त्री अश्विनी वैष्णव: सूचितवान् यत् छात्रा: उच्चशिक्षाप्राप्तये सरलतया ऋणं प्राप्तुम् अर्हा: भविष्यन्ति । योजनाया: लाभं प्राप्तुं छात्रा: एकीकृते आन्तर्जालिक पीएम-विद्यालक्ष्मी इत्यस्मिन् पटले आवेदनं कुर्तुं शक्ष्यन्ति।

राष्ट्रपति-परिणाम

अमरीकाया: राष्ट्रपति-पदाय निर्वाचनस्य परिणाम: आगत:। डोनाल्ड-ट्रम्प: निर्वाचनेऽस्मिन् विजयम् अधिगतवान्। परिवर्तमानस्य परिदृश्यस्य संकेतस्य सम्प्रापणानन्तरं कमला हैरिस: हावर्ड-विश्वविद्यालये स्वीयं संबोधनं निरस्तं कृतवती। ट्रम्पस्य प्राप्तानां मतानां संख्या विजयाय आवश्यकं सप्तत्युत्तर-द्विशितं संख्यात: अग्रे अस्ति। डोनल्ड ट्रम्पेण द्वितीय-कार्यकाले अमरीकां सुदृढीकर्तुमनेकेषां परिवर्तनानां संकेत: प्रदत:।

प्रधानमंत्री नरेन्द्र मोदी- डोनल्ड ट्रंपाय

प्रधानमंत्री नरेन्द्र मोदी राष्ट्रपति निर्वाचनस्य विजये श्री डोनल्ड ट्रंपाय वर्धापनानि प्रदत्तवान्। एकस्मिन् सामाजिक अन्तर्जाल संपुटके प्रधानमन्त्रिणा उक्तं यत् भारत-अमेरिका-रणनीतिक-सहसम्बन्धं सुदृढम् कर्तुं सः उत्सुकः अस्ति। श्री मोदी वैश्विकशान्तिं, स्थिरतां, समृद्धिं च प्रवर्धयितुं, उभयोः देशयोः जनानां हिताय मिलित्वा कार्यं कर्तुं च प्रतिबद्धतां प्रकटितवान्।

गोवा-चलच्चित्रमहोत्सव:

पञ्चपञ्चाशत्तम: अन्ताराष्ट्रिय-चलच्चित्र-महोत्सव: अस्य मासस्य विंशति दिनाङ्के गोवायां समारप्स्यते। नव-दिवसात्मके एतस्मिन् महोत्सवे फिल्मबाजार इत्याख्यस्य अष्टादशमं संस्करणं सम्मिलितं भविष्यति। यत् पञ्चविंशति दिनाङ्कं यावत् प्रचलिष्यति।

नीत्यायोग:

नीति-आयोग: जलप्रबन्धन-संरक्षण-स्थिरता: प्रति जागरूकतां संवर्धयतुं अद्यारभ्य पञ्चदश-दिवसीयं जल-उत्सवं प्रारब्धवान्। अभियानमिदं प्रधानमन्त्रिण: श्रीमोदिन: कृतसङ्कल्पनान्तर्गतम् विद्यते। विगतवर्षे दिसम्बरमासे आयोजिते तृतीये मुख्यसचिवानां सम्मेलनावधौ नदीउत्सव इत्यस्मिन् आधारित: जल उत्सवस्य विचार: अपि स्थापित: । नीति-आयोग: कथितवान् यत् जल उत्सवोऽयं अद्यारभ्य चतुर्विंशतिदिनांकं यावत् विंशति आकांक्षि-जनपदेभ्य: मण्डलेभ्यश्च क्रियान्वितो भविष्यति।

## <u>महापर्व छठ्</u>

लोकस्य आस्थायाः महापर्व छठ् षष्ठीपर्वणि  अद्य सायंकाले खरना-विधानेन सम्पन्न: भविष्यति। श्वः सायं अस्तंगमिने सूर्याय, शुक्रवासरे प्रातःकाले च उदीयमानसूर्याय अर्घमर्पयित्वा व्रतिणाम् पारणेन षष्ठीपर्वणः समापनं भविष्यति। इदं पर्व भेदरहितं सामाजिक-सामानतां प्रदर्शयति। अस्मिन् वर्षे विभिनेषु कारागारेषु च छठ पूजनम् क्रियते। मुजफ्फरपुररस्य खुदीराम सेंट्रल जेल मध्ये केचन् कारागार बद्धा: इस्लाम-भक्ता: अपि छठ-पूजनं कारागारे कुर्वन्ति।

## <u>विशेषरेलयानम्</u>

तत्रैव छठपूजोत्सवम् अभिलक्ष्य रेलविभाग: यात्रिणां यात्रासौकर्यार्थं विशेष-रेलयानानि प्रचालयति। अद्य आहत्य नवदश उत्सव-सम्बद्धानि विशिष्ट-रेलयानानि दिल्ली-राष्ट्रियराजधानी-क्षेत्राभ्यां देशस्य विभिन्नेभ्य: भागेभ्य: प्रचाल्यन्ते। भागलपुर-अयोध्या-गया-बलिया-पटना-सहरसा-सीतामढी-दरभंगा-कटरा-मुम्बई-नगराणां कृते एतानि रेलयानानि सञ्चाल्यन्ते।

## <u>महाराष्ट्र-झारखंड-निर्वाचनम्</u>

झारखण्डराज्ये विधानसभा-निर्वाचनस्य प्रथमचरणीय-मतदानाय प्रचाराभियानं तीव्रं भूतम्। रक्षामन्त्री भाजपेतिदलस्य वरिष्ठनेता च राजनाथसिंह: ह्य: रांचीनगरे लोहरदगा इत्यत्र जनसभां सम्बोधितवान्। राजनाथसिंह: झारखण्डमुक्ति मोर्चा दलस्य नेतरि मुख्यमन्त्रिणि च हेमन्तसोरेनोपरि राज्यस्य विनाशस्य आरोपं ख्यापितवान्। उक्तवान् च यत् राज्ये प्रशासन परिवर्तनस्य समय: समागत: सम्प्रति। काङ्ग्रेस दलाध्यक्ष: मल्लिकार्जुनखडगे हजारीबाग स्थलस्य माण्डू क्षेत्रे इण्डी संयुते: प्रत्याशिनां समर्थने प्रचारं कृतवान् तत्रैव वरिष्ठ: झामुमोदलीय: नेता हेमन्तसोरेन: अपि राज्येऽस्मिन् नैका: जनसभा: सम्बोधितवान्। अत्रावधौ महाराष्ट्रे अपि एकलचरणीय-विधानसभा निर्वाचनाय नैर्वाचनिक प्रचाराभियानं द्रुतगत्या विधीयते। लोकसभायां विपक्षनेता कांग्रेसदलीय: राहुल-गांधी नागपुर-मुम्बई-नगरयो: प्रचारं करिष्यति इति।

शारदासिन्हा

प्रसिद्धायाः लोकगायिकायाः शारदासिन्हा इत्यस्याः निधनं नवीनदिल्लीनगरे जातम् । राष्ट्रपतिः प्रधानमन्त्री च शोकं प्रकटितवन्तौ।

सुप्रसिद्धायाः लोकगायिकायाः शारदासिन्हा इत्यस्याः गतरात्रौ नवीदिल्लीनगरे निधनं जातम्। सा द्विसप्तति वर्षीया आसीत्। सा राष्ट्रियराजधान्या: अखिलभारतीय आयुर्विज्ञानसंस्थायां अन्तिमं श्वासं गृहीतवती। भोजपुरी-मैथिली-लोकगीतानां कृते प्रसिद्धा शारदा सिन्हा पद्मश्री, पद्मभूषण, संगीत नाटक अकादमी आदीभिः पुरस्कारैः सम्मानिता अभवत्।

राष्ट्रपतिः द्रौपदी मुर्मु: तस्याः निधने दुःखं प्रकटितवती

जम्मूकश्मीर:

जम्मूकश्मीर-विधानसभया अद्य केन्द्र-शासितप्रदेशाय विशिष्टराज्यस्य उपाधये संवैधानिकमान्यतौ च एक: प्रस्ताव: पारित:। अद्य प्रात: सदनस्य कार्यचरणारम्भे उपमुख्यमन्त्री सुरिन्दर कुमार चौधरी एनं प्रस्तावं प्रस्तुतवान् यस्मिन् विशिष्टराज्याय अभ्यर्थनमिदं लिखितमासीत्।

जयशंकर:-ऑस्ट्रेलियादेश:

विदेशमन्त्री डॉ. जयशंकर: अद्य ऑस्ट्रेलियादेशीयेन प्रधानमन्त्रिणा एन्थनी अल्बनीजइत्यमुना साकं मन्त्रणां कृतवान् सहैव प्रधानमन्त्रिण: नरेन्दमोदिन: पक्षत: शुभकामना: अपि प्रदत्तवान्। अत्रावधौ विदेशमन्त्री ऑस्ट्रेलिया-भारत-संसदीय-मैत्री-समूहस्य सदस्यै: साकमपि वार्तां कृतवान्। तदनु विदेशमन्त्रिणा कैनबरायां न्यूजीलैण्डदेशीयेन समकक्षेण विंस्टन-पीटर्स-इत्यनेन साकम् अपि उपवेशनं विहितवान्। उभौ नेतारौ हिन्दप्रशान्त-वैश्विक-प्रसङ्गेष्वपि चर्चां साधितवन्तौ। एतदनन्तरं संयुक्त अरब अमीरातदेशस्य विदेशमन्त्रिणा शेख-अब्दुल्ला-बिन-जाएद-बिन-सुल्तान-अल-नाह्यान इत्यनेन साकं मेलनं कृतवान्।

।।इति वार्ता:।।